# संस्कृतवार्ता:

दिनाङ्क :-  17/02/2025                                        सायम्  - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- जनसम्र्मस्य प्रबन्धनाय देशस्य षष्टि-रेल-स्थानकेषु रेलविभाग: स्थायि-प्रतीक्षाक्षेत्राणि स्थापयिष्यति।
- भारतेन दश-टन-भारमितं प्रणोदक-मिश्रकं विकसितम् इत्यकथयत् भारतीयान्तरिक्षानुसन्धान-संङ्घटनम्
- वित्तमन्त्रिणा निर्मलासीतारमण इत्यनया अद्य मुम्बय्यां सूक्ष्म-लघु-मध्यमोद्यमानां कृते म्यूचुअल-क्रेडिट-गारंटी इत्येषा योजना समारब्धा । अनया योजनया प्रतिभूतिं विना उपकरणानां क्रयणाय सूक्ष्म-लघु-मध्यमोद्यमानां कृते शतकोटिरूप्यकाणां ऋणसौविध्यं प्रदास्यते ।
- कतरदेशस्य आमिर-शेख-तमीम-बिन-हमद-अल-थानी इत्येषः अद्यारभ्य भारतस्य द्विदिवसीयायां राजकीययात्रायाम् आगमिष्यति ।
- विमेन्स्-प्रीमियर-लीग इति क्रिकेट-क्रीडा-द्वन्द्वे अद्य सायङ्काले देहली-कैपिटल्स्-दलं रॉयल-चैजेअ्र्स-बैङ्गलुरु-दलं सम्मुखीकरिष्यति।

----------------------------------

रेलविभागः- प्रतीक्षाक्षेत्राणि

जनसम्मर्दस्य प्रबन्धनाय देशस्य षष्टि-रेल-स्थानकेषु रेलविभाग: स्थायि-प्रतीक्षाक्षेत्राणि स्थापयिष्यति। रेलमन्त्रालयः प्रोक्तवान् यत् अतिव्यस्त-कालावधौ जनसम्मर्दस्य प्रबन्धनाय अयं निर्णय: स्वीकृत: अस्ति। रेलविभाग: जनसम्मर्दानां निरीक्षणाय उन्नत-प्रौद्योगिक्या: अपि उपयोगं करिष्यति। यात्रिणां सौविध्यं सुगम-यात्रां च निरीक्षितुं दिल्ल्या: सर्वेषु रेल-स्थानकेषु

विशिष्टाभियानम् अपि चालयिष्यते। अभियानावधौ रेलविभाग: यात्रिणां, आपणिकानां, आरक्षकानां ,भारवाहकानां च प्रतिक्रियां ज्ञास्यति । यात्रिणां सुगमयात्रां सुनिश्चेतुं अग्रिम-सप्ताहं यावत् नवदिल्ली-रेल-स्थानके सायं चतुर्वादनतः रात्रौ एकादश-वादनपर्यन्तं प्लेटफॉर्म-टिकट इति न प्रदास्यते । सङ्गमे पवित्रं स्नानं कृत्वा भक्तानां गृहं प्रत्यागमनाय प्रयागराजस्य विभिन्न-स्थानकेभ्य: आहत्य अष्टत्रिंशदधिक-त्रिशत-विशेष-रेलयानानि प्रचालितानि सन्ति। रेलविभागेन कथितं यत् एतेषु रेलयानेषु अष्टादश-लक्षाधिक-यात्रिणः यात्रां कृतवन्त:।

-----------------------------------

<u>इसरो</u>

एकस्य प्रमुखप्रौद्योगिकस्य अविष्कारस्य अन्तर्गतं, भारतेन Solid rocket motors इत्यस्य कृते विश्वस्य बृहत्तमं दश-टन-भारमितं प्रणोदक-मिश्रकं विकसितम् अस्ति। एतत् मिश्रकं भारतीयान्तरिक्षानुसन्धान-सङ्घटनस्य सतीश-धवन-अन्तरिक्ष-केन्द्रेण बेङ्गलुरु-नगरे केन्द्रीय-विनिर्माण-प्रौद्योगिकी-संस्थानस्य सहयोगेन विनिर्मितम् अस्ति । मिश्रकस्य भार: पञ्चाशदधिक-एकशत-टनमितः वर्तते एवञ्च एतत् मिश्रकं सप्त-दशांशोत्तर अष्ट-मीटर-परिमितं यावत् उन्नतम् अस्ति सहैव एतत् चत्वारि दशांशोत्तर-पञ्चमीटरमितं यावत् दीर्घं, त्रीणि दशांशोत्तर-त्रिमीटरमितं यावत् विस्तृतं वर्तते। भारतीयान्तरिक्षानुसन्धान-सङ्घटन-कारणेन पुन: एकदा अस्माकं देश: गौरवास्पदं क्षणम् अवाप्नोत्। दशटनमितस्य उर्ध्वाधर-मिश्रकस्य उत्पादनं भारतस्य वर्धमानप्रौद्योगिक्याः, कुशलतायाः, आत्मनिर्भरतायाः नवाचारस्य च प्रतिबद्धताया: प्रमाणं वर्तते।

-----------------------------------

<u>सीतारामन्-मुम्बई:</u>

वित्तमन्त्रिणा निर्मलासीतारमण इत्यनया अद्य मुम्बय्यां सूक्ष्म-लघु-मध्यमोद्यमानां कृते म्यूचुअल-क्रेडिट-गारंटी इत्येषा योजना समारब्धा । अनया योजनया प्रतिभूतिं विना

उपकरणानां क्रयणाय सूक्ष्म-लघु-मध्यमोद्यमानां कृते शतकोटिरूप्यकाणां ऋणसौविध्यं प्रदास्यते। वित्तमंत्रिणा प्रोक्तं यत् अनेन सूक्ष्म-लघु-मध्यमोद्यम-क्षेत्रे वृद्धिः भविष्यति। मंत्रिवर्या प्रोक्तवती यत् भारते अधुना एतादृशं वातावरणम् अस्ति यत्र निवेशेन उत्तमपरिणामाः लभ्यन्ते। सा अकथयत् यत् सर्वकारः अनुकूलनीतिभिः रक्षाविनिर्माण-क्षेत्रस्य समर्थनम् अकरोत्। अस्य परिणामे भारतस्य रक्षानिर्यातः चतुर्विंशति-सहस्रकोटि-रूप्यकाणां सञ्जातः अस्ति अपि च महाराष्ट्रम् रक्षानिर्माणस्य केंद्रत्वेन विकसितं भविष्यति इत्यपि सा अकथयत्।

-----------------------------------

<u>कतर-आमिर-शेख:</u>

कतरदेशस्य आमिर-शेख-तमीम-बिन-हमद-अल-थानी इत्येषः अद्यारभ्य भारतस्य द्विदिवसीयायां राजकीययात्रायाम् आगमिष्यति। यात्रावधौ शेख-तमीमः प्रधानमन्त्रिणा नरेन्द्र-मोदिना सह वार्तां विधास्यति। तेन सह मन्त्रिणः, वरिष्ठाधिकारिणः, एकं व्यापारिक-प्रतिनिधिमंडलं च समेत्य एकम् उच्चस्तरीय-प्रतिनिधिमण्डलम् अपि भविष्यति। विदेशमंत्रालयेन एकस्मिन् वक्तव्ये प्रोक्तं यत् आमिरशेखस्य इयं यात्रा वर्धमानं परस्परसहयोगं समधिक-गतिं प्रदास्यति। विदेशमन्त्रालयः प्रोक्तवान् यत् वर्तमानवर्षेषु व्यापार-निवेशोर्जा-प्रौद्योगिकी-संस्कृति-जनसम्पर्क-सम्बद्धेषु क्षेत्रेषु द्वयोः देशयोर्मध्ये पारस्परिक-सम्बन्धाः सुदृढाः अभवन्।

-----------------------------------

<u>महाकुम्भवार्ता</u>

सम्प्रति महाकुम्भ वार्ता:,

*<u>लखनऊनगरात् चिकनकारी इत्याख्या वस्त्रनिर्माणशैली, कन्नौजनगरात् सुगन्धितद्रव्याणि, फिरोजाबादत: काचक्रीडनकानि, रायबरेलीत: काष्ठकर्म अन्यहस्तशिल्पोत्पादा: च अभ्यागतेभ्य: प्रमुखाकर्षणा: सन्ति। आकाशवाण्या सह वार्ताविधौ हमीरपुरस्य एक: आपणिक: मोंटी ODOP प्रदर्शन्यां विक्रीतानां हस्तनिर्मितानां पादत्राणानां विशिष्टताम् उद्घाटितवान्।</u>*

*तत्रैव मथुरायाः उर्मिला शर्मा उक्तवती यत् प्रदर्शन्यां भगवतः श्रीकृष्णस्य विक्रीतानि आभूषणानि वस्त्राणि च नगरस्य संस्कृतिं प्रतिबिम्बयन्ति।*

*अभ्यागताः ODOP स्थले अपि स्मरणीयसमयं यापयन्ति। आकाशवाण्या सह वार्तासमये अनुग्रहः सिंहः उक्तवान् यत् इयं प्रदर्शनी महाकुम्भमेलकस्य आनन्दानुभवं प्रशंसयति।*

*'एकः जनपदः, एकोत्पादः' इति उपक्रमः सूक्ष्मलघुमध्यमोद्यमं स्थानीयार्थव्यवस्थां च संवर्धयितुम् अभूतपूर्वप्रयासो वर्तते। महाकुम्भः न केवलम् आध्यात्मिकं सांस्कृतिकं च परिचयं सुदृढीकरोति अपि तु उद्यमिभ्यः एकः विशालमञ्चः अपि सञ्जातः।*

-----------------------------------

परीक्षा पे चर्चा:

परीक्षा-पे-चर्चा इत्यस्य सप्तमे भागे ,मुष्टिक्रीडिका ओलम्पिक-पदकविजेत्री मैरीकॉम , पैरालम्पिक-स्वर्ण-पदक-विजेत्री लक्ष्यभेदिका अवनि-लेखरा, भारतीय-बैडमिन्टन-क्रीडकः सुहास-लालिनाकेरे-यतिराजः च परीक्षाभयं निवारयितुं स्वकीयानुभवान् प्रस्तुवन् । बैडमिन्टन-क्रीडकः सुहास-लालिनकेरे-यतिराजः रूचिपूर्ण-गतिविधेः आयोजनम् अकरोत् जीवनात् नकारात्मकभावान् च दूरीकर्तुं उपायान् प्रस्तुतमकरोत् । भारतीय-लक्ष्यभेदिका अवनि-लेखरा छात्रान् अकथयत् यत् यदि ते पूर्ण-ध्यानेन दैनिकाध्ययनं करिष्यन्ति तर्हि ते नित्यसूचनाभिः अद्यतनं भवितुं शक्नुवन्ति । सा प्रोक्तवती यत् श्वासोच्छ्वासस्य अनेके व्यायामाः सन्ति यान् विधाय परीक्षावधौ हृदय-गतिम् शान्तं कर्तुं साहाय्यमवाप्तुं शक्नुमः ।

परीक्षा-पे-चर्चा इति प्रकरणस्य दृश्यसम्वादसंदेशं प्रस्तुवन् , प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् देशस्य क्रीडकाः स्वस्य स्थिति-स्थापकतया, एकाग्रतया, विजय-मनोवृत्त्या च जनान् प्रेरयन्ति।

-----------------------------------

भारतम्-दूरवाणीनिर्यातः

भारतस्य चलदूरभाष-निर्यातः जनवरीमासे चत्वारिंशदुत्तरैकशत-प्रतिशतं सम्वर्ध्य पञ्चविंशति-सहस्र-कोटिरूप्यकाणां शीर्षस्तरम् अध्यगच्छत् । इयं उल्लेखनीया वृद्धिः ऐप्पल-सैमसंग इति चलदूरभाष-निर्मातृभ्यां समधगिता याभ्यां भारतनिर्मितानां चलदूरभाषाणां विदेशनिर्याते वृद्धिः आनीता । वर्तमाने वित्तवर्षे अप्रैलमासादारभ्य जनवरीमासं यावत् दूरभाषनिर्यातः पञ्च-पञ्चाशल्लक्षोत्तरैक-कोटि-लक्ष-रूप्यकाणां शिखरं प्राप्नोत् ।यः विगतवर्षस्य समानावधौ विंशत्युत्तरैकशत-अधिक-नवनवति-सहस्रकोटि-रुप्यकाणाम् आसीत् ।

-----------------------------------

<u>क्रिकेट</u>

विमेन्स्-प्रीमियर-लीग इति क्रिकेट-क्रीडा-द्वन्द्वे अद्य सायङ्काले वडोदराया: कोटाम्बी-क्रीडाङ्गणे देहली-कैपिटल्स्-दलं रॉयल-चैजेञ्चर्स-बैङ्गलुरु-दलं सम्मुखीकरिष्यति। इयं स्पर्धा सायं सार्धसप्तवादने प्रारप्स्यते।

।। इति वार्ता:।।